# A-II/1/1360/21

## तृतीयसत्रार्द्धम्

## प्रथमपत्रम्

## पुराणेतिहासः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. विप्रशापव्याजेन कृष्णः किं चकार ?
2. विदेहस्य कैः सह सम्वादः जातः ?
3. अनन्तसुखं कः विन्दति ?
4. सुरेप्सितं राज्यलक्ष्मीं त्यक्त्वा कः वनं जगाम ?
5. यदुः कं दृष्ट्वा सुखकारणं पप्रच्छ ?
6. पाण्डुसुताः कैः कोपिताः ?

**अथवा**

कुत्र वासे कलहो भवेत् ?

7. कः नष्टदृष्टिः पतङ्गवत् नश्यति ?

**अथवा**

कौ चिन्तया विमुक्तौ भवतः ?

8. विसर्गाद्याः श्मशानान्ताः भावाः कस्य भवन्ति ?

**अथवा**

क्षितेः किं व्रतमवधूतेन धारितम् ?

9. कथं मनुजाः आत्मानं समुद्धरन्ति ?

**अथवा**

कूर्मावतारे भगवता किं विहितम् ?

10. जिज्ञासुः कं गुरुं प्रपद्येत ?

**अथवा**

विदेहनगरे का तिष्ठन्ती आसीत् ?

11. यतिर्वनचरः किं न श्रुणुयात्?

12. जीवः कर्मफलानि कथं भुङ्क्ते?

13. दत्तात्रेयस्य कति गुरवः आसन्? के च ते?

14. त्रेतायां भगवतः कः वर्णः स्मृतः?

15. के चाटकान् वदन्ति?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. द्वारपरयुगे ईश्वरस्य स्वरूपं प्रतिपादयत।

17. कलियुगधर्मान् सविस्तरं वर्णयत।

18. भगवद्भक्तलक्षणानि पठितग्रन्थाधारेण विमृशत।

**अथवा**

कपोताख्यानं तत्रोपदिष्टानि तत्त्वानि च विमृशत।

19. श्रीमद्भागवतोक्तं मायालक्षणं स्पष्टयत।

**अथवा**

मधुहाहरिमीनाः कां शिक्षां ददति? लिखत।

20. श्रीमद्भागवतोक्ताः अवतारकथाः वर्णनीयाः।

**अथवा**

पिप्पलायनोक्तं ब्रह्मतत्त्वम् आलोचनीयम्।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. सत्सङ्गमहिमानं श्रीमद्भागवताधारेण प्रतिपादयत।

**अथवा**

यदुकुलसंहारकथां सविस्तरं वर्णयत।

**अथवा**

श्रीमद्भागवतमहापुराणस्य परिचयः देयः।

# A-II/2/1361/21

## तृतीयसत्रार्द्धम्

## द्वितीयपत्रम्

## पुराणेतिहासः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. ईश्वरे अनुरक्तिः का कथ्यते ?
2. "अथ" शब्दो किं वाचकः ?
3. ज्ञानं कया क्षीयते ?
4. चतुर्विधाः भक्ताः के ?
5. कस्याः फलम् अनन्तमिति ?
6. इतरापेक्षावशात् का मुख्या ?
7. "ज्ञानवान्मां प्रपद्यते" कुत्रोक्तम् ?
8. श्रुतिभ्यः का प्रमेया ?
9. योगः कयोः साहाय्यं विदधाति ?
10. समाधिसिद्धिः कया भक्त्या जायते ?
11. रागत्वादपि का हेया न ?

**अथवा**

अबन्धः कस्य मुखमिति ?

12. प्रश्ननिरूपणाभ्यां कस्याः आधिक्यसिद्धिः ?

**अथवा**

ईश्वरस्य नानात्वं कथमिति ?

13. किमर्थं श्रद्धा मुख्या न ?

**अथवा**

प्राणिबुद्धिभ्यः असम्भवं नाम किम् ?

14. तत्त्वे अनवस्थानात् का भक्तिपदवाच्या न ?

**अथवा**

माया कस्य शक्तिः ?

15. ब्रह्मप्रतिपत्तिः ऐश्वर्यपदा इति कस्य मतम् ?

**अथवा**

को नाम भजनीयः ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. "अथातो भक्तिजिज्ञासा" सूत्रस्य व्याख्या कार्या।

17. "रागरूपाऽपि भक्तिः न हेया" इति विमृशत।

18. भक्त्या ज्ञानस्य उपेक्षत्वं प्रकाशयत।

**अथवा**

ईश्वरस्य ऐक्यं लिखत।

19. भक्तेः क्रियाकृत्यनपेक्षणत्वं साधयत।

**अथवा**

ईश्वरस्य पितृतुल्यत्वं यथाग्रन्थं विमृशत।

20. "सा मुख्येतराऽपेक्षितत्वात्" सूत्रमिदं व्याख्यात।

**अथवा**

जीवानां ब्रह्मणा अभेदत्वं प्रकाशयत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. भक्तेः सर्वश्रेष्ठत्वं यथाग्रन्थं पर्यालोचयत।

**अथवा**

गौणीभक्तेः साधनत्वं सोदाहरणं प्रस्तुवत।

**अथवा**

"भजनीयेन अद्वितीयं जगदिति" प्रतिपादयत।

# A-II/3/1362/21

## तृतीयसत्रार्द्धम्

## तृतीयपत्रम्

## पुराणेतिहासः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. चित्रसूत्रप्रकरणस्य वक्ता कः कश्च श्रोता ?
2. सर्वाः देवयोषितः कथं व्रीडिताः जाताः ?
3. हंसपुरुषस्य प्रमाणं किम् ?
4. भद्रपुरुषस्य चित्रं कथं भवेत् ?
5. मालव्यस्य चित्रं कथं चित्रयेत् ?
6. चित्रसूत्रे पुरुषाः कतिविधः ?
7. चित्रे स्त्रीरूपं कथं करणीयम् ?
8. चित्रे कानि मुख्यानि वर्जनीयानि ?
9. कीदृशां दृष्टिः चित्रे वर्जनीया ?
10. मूलरङ्गानां नामानि कानि ?
11. चित्रं कतिविधम् ? तेषां नामानि कानि ?

**अथवा**

चित्रकर्मणि भूषणं किम् ?

12. चित्ररसाः कति स्मृताः ?

**अथवा**

13. कीदृशं चित्रं धन्यमुशन्ति ?

**अथवा**

14. मानहीनप्रतिमायां के विशन्ति ?

**अथवा**

राज्ञां करयोः कति रेखाः कार्याः ?

15. सर्वे रसाः कुत्र कार्याः ?

**अथवा**

चित्रे किन्नराः कतिविधः ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. चित्रसूत्रदृष्ट्या शिवरूपनिर्माणं प्रकाशयत।

17. देवप्रतिमायां देवानां शुभलक्षणा दोषलक्षणा च दृष्टयः निरूपणीयाः।

18. चित्रविदः लक्षणं लिखत।

**अथवा**

चित्राणां नवस्थानानि विवेचयत।

19. कुड्ये प्रलेपविधानं निरूपयत।

**अथवा**

चित्रसूत्रे कमलरूपं लिखत।

20. चित्रे सूर्यरूपनिर्माणं प्रकाशयत।

**अथवा**

सोमरूपनिर्माणं निरूपयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. आधुनिकसमाजे चित्रसूत्रप्रकरणस्योपयोगितां प्रमाणयत।

**अथवा**

विष्णुधर्मोत्तरपुराणे चित्रसूत्रप्रकरणस्य स्थानं निरूपयत।

**अथवा**

चित्रकर्मणि नवरसानां प्रयोगं प्रकाशयत।

# A-II/4/1363/21

## तृतीयसत्रार्द्धम्

## चतुर्थपत्रम्

## पुराणेतिहासः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. गंगादेव्याः वैशिष्ट्यं प्रतिपादयत।
2. प्रकृतिः केन सृष्टा? सा कथं पञ्चधा स्मृता?
3. सरस्वती देवी कीदृशी भवति?
4. परमात्मनः श्रीकृष्णस्य रासेश्वरी देवी का?
5. सरस्वतीपूजा केन विनिर्मिता?
6. के दीर्घवर्षशतं कालयुतं, यास्यन्ति?
7. तुलसीदेवी कथं शङ्खचूडं विवाहं कृतवती?
8. रतिः कस्य पत्नी इति कथ्यते?
9. किमर्थं जनाः दिवाकरं पूजयन्ति?
10. भगवतः विष्णोः कति पत्न्यः आसन्? तासां नामानि लिखत।
11. किमर्थं दिवाकरः वृशध्वजं 'भ्रष्टश्री भव' इति अभिशापं दत्तवान्?

    **अथवा**

    वेदवत्याः मातुः नाम किम्? सा प्रसूतिकाले किं कृतवती?
12. वेदमाता का? तस्याः पूजनेन को लाभः?

    **अथवा**

    शङ्खचूडः कः? सः पूर्वजन्मनि केन नाम्ना प्रसिद्धः आसीत्?
13. किमर्थं शङ्करशङ्खचूडयोः मध्ये युद्धमभूत्?

    **अथवा**

    कथं तुलसीदेव्याः पातिव्रत्यं नष्टं जातम्?

14. लक्ष्मीदेवी किदृशी भवति?

**अथवा**

कार्त्तिकपूर्णिमायां कस्य महोत्सवः अनुष्ठीयते?

15. षष्ठीदेवी केषां माता भवति? तस्याः पूजनेन को लाभः?

**अथवा**

किमर्थं: जनाः गणेशं पूजयन्ति?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. गंगास्नानमाहात्म्यं ग्रन्थदिशा वर्णयत।

17. लक्ष्मीदेव्याः स्वरूपं यथाग्रन्थं लिखत।

**अथवा**

शरत्पूर्णिमामाहत्म्यं वर्णयत।

18. सरस्वतीदेव्याः पूजाविधानं वर्णयत।

19. तुलसीदेव्याः महत्वं ग्रन्थानुसारेण लिखत।

**अथवा**

भगीरथस्य तपश्चर्यां वर्णयत।

20. गंगावतरणकथां ग्रन्थदिशा वर्णयत।

**अथवा**

राजावृषध्वजस्य चरित्रं यथाग्रन्थं वर्णयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. वेदवत्युपाख्यानं यथाग्रन्थं वर्णयत।

**अथवा**

कलियुगचरित्रं ग्रन्थदिशा वर्णयत।

# A-II/5/1364/21

## तृतीयसत्रार्द्धम्

## पञ्चमपत्रम्

## पुराणेतिहासः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. प्रतिद्वापरं विष्णुः केन रूपेणावतरति ?
2. पुराणशब्दस्य का व्युत्पत्तिः कश्चार्थः ?
3. सत्यवतीसुतेति अभिधानं कस्य ?
4. राजशेखरस्य मतानुसारमितिहासः कतिविधः ? के च ते ?
5. रोमहर्षणसुतः कस्मात् समुत्पन्नः ?
6. शौनकः कस्य पुत्रेति पुराणेषु ख्यातः ?
7. कति महापुराणानि ? तेष्वन्तिमं पुराणं किम् ?
8. सात्विकपुराणानां नामानि लिखत।
9. शिवमहापुराणस्य श्लोकसंख्या का ?
10. कः सर्गः ? तल्लक्षणं च किम् ?
11. पुराणानां दशलक्षणानि कस्मिन् पुराणे विलोक्यन्ते ?

    **अथवा**

    मन्वन्तरं कतिविधम् ? तेषां नामानि कानि ?
12. षट्पौराणिकानां नामानि लिखत।

    **अथवा**

    अजनाभेति कस्य देशस्य प्राचीनं नाम ?
13. अष्टादशपुराणेषु व्यासस्य वचनद्वयं किम् ?

    **अथवा**

    ब्रह्मणा प्रथमं किं शास्त्रं स्मृतम् ?

14. शिवमाहात्म्यप्रतिपादकं पुराणं किम् ?

**अथवा**

कस्मिन् पुराणे अग्नेः माहात्म्यमुपलभ्यते ?

15. अष्टादशपुराणानां कः वक्ता कश्च श्रोता ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पुराणानां वर्गीकरणं सविस्तरं वर्णयत।

17. पुराणशब्दस्य व्युत्पत्तिः अर्थनिरूपणं च कार्यम्।

18. व्यासवंशं वर्णयत।

**अथवा**

पुराणोपादानानि निरूपयत।

19. पुराणानुसारेण सूत्रोत्पत्तिकथा वर्णनीया।

**अथवा**

श्रीमद्भागवतपुराणोक्तभूगोलस्वरूपं प्रतिपादयत।

20. पुराणानां वर्गीकरणं विवेचयत।

**अथवा**

मुक्तिप्रयोजकानि पुराणानि साधयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. "भारतं पञ्चमो वेदः" शीर्षकोपेतः प्रबन्धः लेख्यः।

**अथवा**

पुराणानां वेदमूलकत्वं साधयत।

**अथवा**

पुराणलक्षणानि विमृशत।